संस्कृतवार्ता:

दिनाङ्क :-11.02.2025 प्रात: - 06:55

अथ वार्ता:

## प्रधानमन्त्री-परेसनगरम्

प्रधानमन्त्रिण: नरेन्द्रमोदिन: फ्रांसदेशे भव्यं स्वागतम् अभवत्। फ्रांसदेशस्य सशस्त्रबलानां मन्त्री सेबेस्टियन-लेकॉर्नू इत्यसौ विमानपत्तनस्थानके प्रधानमन्त्रिण: स्वागतं कृतवान् तत्रैव पेरिसनगरे भारतीय-समुदायै: तस्मै वर्धापनानि प्रदत्तानि। तदनु प्रधानमन्त्री फ्रांसदेशीयेन राष्ट्रपतिना इमैनुएल-मैक्रोंइत्यनेन समायोजिते ए. आई.इति शिखरसम्मेलने भागग्रहणाय नेतृणां कृते आयोजिते रात्रिभोजने सहभागं स्वीकृतवान्। एकस्मिन् सामाजिकसञ्चारतन्त्रे श्रीमोदी स्वमित्रेण राष्ट्रपतिना मैंक्रोंइत्यनेन सह मिलित्वा कियद् आनन्द: प्राप्त: इति अभिव्यक्तवान्। प्रधानमन्त्री कार्यक्रमावधौ अमेरिकादेशस्य उपराष्ट्रपतिना जे.डी. वेन्स इत्यमुना साकं वार्तालापं साधितवान्। प्रधानमन्त्री ए. आई. एक्शन-इत्येतस्मिन् शिखरसम्मेलने भागं ग्रहीतुं सज्जो वर्तते यत्र भारतं वैश्विक-ए. आई. मानकानां स्थापनार्थं विकासार्थं च बहुविध-उद्देश्यै: सह सहाध्यक्षतां करोतीति। भारत-फ्रांस-देशयोर्मध्ये हस्ताक्षरस्य सम्भावनापि वर्तते। प्रधानमन्त्री मार्सिले इत्येस्यापि यात्रां विधास्यति तत्रासौ फ्रांसदेशे प्रथमस्य भारतीय-वणिज्य-दूतावासस्य उद्घाटनं करिष्यति।

## राष्ट्रपति -यूनानी दिवस

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य नवदिल्ल्यां यूनानी-दिवसम् आलक्ष्य द्विदिवसीयस्य अन्ताराष्ट्रीय-सम्मेलनस्य उद्घाटनं करिष्यति। अत्रावसरे विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र-सिंहऽपि उपस्थितो भविष्यति। फरवरीमासस्य एकादशदिनाङ्के प्रसिद्धस्य यूनानी-चिकित्सकस्य शिक्षकस्य स्वतन्त्रतायोद्धु: हकीम-अजमल-खान-इत्यस्य जयन्त्या: उपलक्ष्ये प्रत्येकस्मिन् वर्षे यूनानीदिवस: परिपाल्यते। आयुषमन्त्रालयस्य अन्तर्गतम् एका प्रमुखा अनुसन्धानपरिषद् एकीकृत-स्वास्थ्य-समाधानाय यूनानी-चिकित्सायां नवाचार: अग्रपथ: इत्येतस्मिन् विषये अस्य द्विदिवसीयान्ताराष्ट्रियस्य सम्मेलनस्य आतिथ्यं करोतीति।

## महाकुम्भ:-रेलविभाग:

प्रयागराजे महाकुम्भे श्व: भविष्यमाणात् माघी-पूर्णिमा-स्नानात् पूर्वं तीर्थयात्रिभ्य: पर्यटकेभ्य: च विशिष्टव्यवस्थां निर्धारयितुं भारतीय-रेल-विभाग: जवीयगत्या कार्यं सम्पादयति। रेलमन्त्री अश्विनी-वैष्णव: ह्य: प्रयागराज-रेलवे-स्थानके व्यवस्थानां निरीक्षणं कृतवान्। निरीक्षणावधौ श्री-वैष्णव: जनसम्मर्दस्य प्रवर्तमानां स्थितिमपि समीक्षितवान्। अपि च वरिष्ठाधिकारीभि: सह रेलसम्बद्धा: सज्जता: चर्चितवान्।

## एयरोइण्डिया-प्रदर्शनी

रक्षामन्त्री राजनाथसिंह: ह्य: बेंगलुरूनगरे बृहत्तमाया: एयरो-स्पेस-इण्डिया इत्यस्या: प्रदर्शन्या: उद्घाटनं कृतवान्। अस्मिन् अवसरे प्रवदन् श्रीसिंह: एशियामहाद्वीपस्य एयरोस्पेस-क्षेत्रे बृहत्तमी एषा प्रदर्शनी

रक्षा-उत्पादने देशस्य बलस्य स्थितिस्थापकतायाः च प्रतिबिम्बः इति अवोचत्। उद्घाटनसमारोहे रक्षामन्त्री अद्भुतां वायुप्रदर्शनीं दृष्टवान्।

## परीक्षा-पे-चर्चा

प्रधानमन्त्रिणा नरेन्द्रमोदिना सुस्वास्थ्याय पौष्टिकाहारस्य आवश्यकताऽस्तीति छात्रेभ्यः परामर्शो दत्तः। परीक्षाकाले मनस्तापानां निवारणाय अपि तेन प्रत्युपायाः प्रोक्ताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्ल्यां परीक्षा-पे-चर्चा कार्यक्रमस्य अष्टमे संस्करणे छात्रैस्सह संलापो विहितः।

## बैडमिण्टन-प्रतिस्पर्धा

बैडमिण्टन्-प्रतिस्पर्धायाम्, एशिया-मिश्रित-समूह-चैम्पियनशिप इत्येतस्य शुभारम्भः चीनदेशस्य किंगदाओ इत्यत्र जातः। लक्ष्यसेनः मालविका-बंसोड इत्यसौ च भारतीयदलस्य नेतृत्वं करिष्यतः। सेनः प्रणॉय इत्यनेन साकं पुरूषाणां स्पर्धायां भारतस्य प्रतिनिधित्वं करिष्यति।

।। इति वार्ताः।।